# saptashatIdhyAnAtmakaM stotram

# સપ્તશતીધ્યાનાત્મકં સ્તોત્રમ્

## Document Information

Text title : saptashatIdhyAnAtmakastotram

File name : saptashatIdhyAnAtmakastotram.itx

Category : devii, durgA, shatI, devI, saptashatI, dhyAnam

Location : doc_devii

Author : rAmakRiShNabhaTTa kAshIkara sampAdita

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Latest update : February 10, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 13, 2021

*sanskritdocuments.org*

# સપ્તશતીધ્યાનાત્મકં સ્તોત્રમ્

શ્રીગણેશાય નમઃ ॥

વિદ્યુદ્દામસમપ્રભાં મૃગપતિસ્કન્ધસ્થિતાં ભીષણાં
  કન્યાભિઃ કરવાલખેટવિલસદ્ધસ્તાભિરાસેવિતામ્ ।
હસ્તૈશ્ચક્રદરાલિખેટવિશિખાઁશ્ચાપં ગુણં તર્જનીં
  બિભ્રાણામનલાત્મિકાં શશિધરાં દુર્ગાં ત્રિનેત્રાં ભજે ॥ ૧॥

માતર્મે મધુકૈટભઘ્નિ મહિષપ્રાણાપહારોદ્યમે
  હેલાનિર્મિતધૂમ્રલોચનવધે હે ચણ્ડમુણ્ડાર્દિનિ ।
નિઃશેષીકૃતરક્તબીજદનુજે નિત્યે નિશુમ્ભાપહે
  શુમ્ભધ્વંસિનિ સહરાશુ દુરિતં દુર્ગે નમસ્તેઽમ્બિકે ॥ ૨॥

યા દેવી મધુકૈટભપ્રમથિની યા માહિષોન્મૂલિની
  યા ધૂમ્રેક્ષણચણ્ડમુણ્ડશમની યા રક્તબીજાશિની ।
યા શુમ્ભાદિનિશુમ્ભદૈત્યદમની યા સિદ્ધલક્ષ્મી પરા
  સા ચણ્ડી નવકોટિશક્તિસહિતા માં પાતુ વિશ્વેશ્વરી ॥ ૩॥

દુર્ગાં ધ્યાયતુ દુર્ગતિપ્રશમનીં દૂર્વાદલશ્યામલાં
  ચન્દ્રાર્ધોજ્જ્વલશેખરાં ત્રિનયનામાપીતવાસોવસમ્ ।
ચક્રં શઙ્ખમિષું ધનુશ્ચ દધતીં કોદણ્ડબાણાશયો-
  ર્મુદ્રેવાભયકામદે સકટિબન્ધાભીષ્ટદાં વાનયોઃ ॥ ૪॥

ભાવોદ્ભેદવૃતા સહાભયવરા વિસ્રસ્તનીલાલકા
  બિમ્બોષ્ઠી તરુણાઽરુણાબ્જચરણા રક્તાન્તનેત્રત્રયા ।
પીનોરુસ્તનભારભઙ્ગુરતનુઃ શ્યામા પ્રસન્નાનના
  દેવી વસ્ત્વરિતા તનોતુ વિભવાનાનન્દયન્તી મનઃ ॥ ૫॥

મુક્તાવિદ્યુત્પયોદસ્ફટિકનવજપાભાસ્વરૈઃ પઞ્ચવક્ત્રૈઃ
  શીતાંશૂલ્લાસિચૂડૈસ્ત્રિનયનલસિતૈર્ભાસુરામચ્છવર્ણામ્ ।

ચક્રં શઙ્ખં કપાલં ગુણપરશુસુધાકુમ્ભવેદાક્ષમાલા
    વિદ્યાપદ્માન્વહન્તીં નમત મુનિનતાં ભારતીં પદ્મસંસ્થામ્ ॥ ૬॥

હંસારૂઢા હરહસિતહારેન્દુકુન્દાવદાતા
    વાણી મન્દસ્મિતતરમુખી મૌલિબદ્ધેન્દુલેખા ।
વિદ્યાવીણાઽમૃતમયઘટાક્ષસ્રજાદીપ્તહસ્તા
    શ્વેતાબ્જસ્થા ભવદભિમતપ્રાપ્તયે ભારતી સ્યાત્ ॥ ૭॥

સૌવર્ણામ્બુજમધ્યગાં ત્રિનયનાં સૌદામિનીસન્નિભાં
    શઙ્ખં ચક્રવરાભયં ચ દધતીમિન્દોઃ કલાં બિભ્રતીમ્ ।
ગ્રૈવેયાઙ્ગદહારકુણ્ડલધરામાખણ્ડલાદ્યૈઃ સ્તુતાં
    ધ્યાયેદ્વિન્ધ્યનિવાસિનીં શશિમુખીં પાર્શ્વસ્થપઞ્ચાનનામ્ ॥ ૮॥

શઙ્ખં ચક્રમથો ધનુશ્ચ દધતીં બિભ્રામિતાં તર્જનીં
    વામે શક્તિમસિં શરાન્કલયતીં તિર્યક્ ત્રિશૂલં ભુજૈઃ ।
સન્નદ્ધાં વિવિધાયુધૈઃ પરિવૃતાં મન્ત્રી કુમારીજનૈ-
    ર્ધ્યાયેદિષ્ટવરપ્રદાં ત્રિનયનાં સિંહાધિરૂઢાં શિવામ્ ॥ ૯॥

શઙ્ખાસિચાપશરભિન્નકરાં ત્રિનેત્રાં
    તિગ્મેતરાંશુકલયા વિલસત્કિરીટામ્ ।
સિંહસ્થિતાં સસુરસિદ્ધનુતાં ચ દુર્ગાં
    દૂર્વાનિભાં દુરિતવર્ગહરાં નમામિ ॥ ૧૦॥

પ્રકાશમધ્યસ્થિતચિત્સ્વરૂપાં વરાભયે સન્દધતીં ત્રિનેત્રામ્ ।
સિન્દૂરવર્ણામતિકોમલાઙ્ગીં માયામયીં તત્ત્વમયીં નમામિ ॥ ૧૧॥

શોણપ્રભાં સોમકલાવતંસાં પાણિસ્ફુરત્પઞ્ચશરેષુચાપામ્ ।
પ્રાણપ્રિયાં નૌમિ પિનાકપાણેઃ કોણત્રયસ્થાં કુલદેવતાં મે ॥ ૧૨॥

ખડ્ગોદ્ભિન્નેન્દુબિમ્બસ્રવદમૃતરસાપ્લાવિતાઙ્ગી ત્રિનેત્રા
    સવ્યે પાણૌ કપાલાદ્ગલદમૃતમથો મુક્તકેશી પિબન્તી ।
દિગ્વસ્ત્રાબદ્ધકાઞ્ચીમણિમયમુકુટાદ્યૈર્યુતા દીપ્તજિહ્વા
    પાયાન્નીલોત્પલાભા રવિશશિવિલસત્કુણ્ડલાલીઢપાદા ॥ ૧૩॥

સદ્યશ્છિન્નશિરઃકૃપાણમભયં હસ્તૈર્વરૈર્બિભ્રતીં
    ઘોરાસ્યાં શિરસાઽસ્રજાસુરુચિરામુન્મુક્તકેશાવલિમ્ ।
સૃક્કાસૃક્પ્રવહાં શ્મશાનનિલયાં શ્રુત્યોઃ શવાલઙ્કૃતિં

શ્યામાઙ્ગીં કૃતમેખલાશવકરાં દેવીં ભજે કાલિકામ્ ॥ ૧૪॥

સર્વાદ્યામગુણામલક્ષ્યવપુષં વ્યાપ્યાખિલં સંસ્તુતાં
લક્ષ્યાં ચ ત્રિગુણાત્મિકાં કનકભાં સૌવર્ણભૂષાન્વિતામ્ ।
બીજાપૂરગદે ચ ખેટકસુધાપાત્રે કરૈર્બિભ્રતીં
યોનિં લિઙ્ગમહિં ચ મૂર્ધ્નિ દધતીં ચણ્ડીં ભજે ચિન્મયીમ્ ॥ ૧૫॥

ધૃત્વા શ્રીર્માતુલિઙ્ગં તદુપરિ ચ ગદાં ખેટકં પાનપાત્રં
નાગં લિઙ્ગં ચ યોનિં શિરસિ ધૃતવતી રાજતે હેમવર્ણા ।
આદ્યા શક્તિસ્ત્રિરૂપા ત્રિગુણપરિવૃતા બ્રહ્મણો હેતુભૂતા
વિશ્વાદ્યા સૃષ્ટિકર્ત્રી વસતુ મમ ગૃહે સર્વદા સુપ્રસન્ના ॥ ૧૬॥

યા સા પદ્માસનસ્થા વિપુલકટિતટીપદ્મપત્રાયતાક્ષી
ગમ્ભીરાવર્તનાભિસ્તનભરનમિતા શુભ્રવસ્ત્રોત્તરીયા ।
લક્ષ્મીર્દિવ્યૈર્ગજેન્દ્રૈર્મણિગણખચિતૈઃ સ્નાપિતા હેમકુમ્ભૈ-
ર્નિત્યં સા પદ્મહસ્તા મમ વસતુ ગૃહે સર્વમાઙ્ગલ્યયુક્તા ॥ ૧૭॥

લક્ષ્મીં કોલ્હાપુરસ્થાં ભુવિ ગણપતિનાઽગ્રે ચ પાર્શ્વદ્વયે તાં
કાલ્યા વાણ્યાઽઽસમન્તાત્પરિજનનિકરૈઃ સેવિતાં દેવતાભિઃ ।
નાગં લિઙ્ગં ચ યોનિં સ્વશિરસિ દધતીં માતુલિઙ્ગં ગદાં તત્
ખેટં શ્રીપાનપાત્રં ત્રિભુવનજનનીં નૌમિ દોર્ભિશ્ચતુર્ભિઃ ॥ ૧૮॥

હસ્તૈઃ પદ્મં રથાઙ્ગ ગુણમથ હરિણં પુસ્તકં વર્ણમાલાં
ટઙ્કં શૂલં કપાલં દરમમૃતલસદ્ધેમકુમ્ભં વહન્તીમ્ ।
મુક્તાવિદ્યુત્પયોધેઃ સ્ફટિકનવજપાબન્ધુરૈઃ પઞ્ચવક્ત્રૈ-
સ્ત્ર્યક્ષૈર્વક્ષોજનમ્રાં સકલશશિનિભાં માતૃકાં તાં નમામિ ॥ ૧૯॥

બ્રહ્માણી કમલેન્દુસૌમ્યવદના માહેશ્વરી લીલયા
કૌમારી રિપુદર્પનાશનકરી ચક્રાયુધા વૈષ્ણવી ।
વારાહી ઘનઘોરઘર્ઘરમુખી ચૈન્દ્રી ચ વજ્રાયુધા
ચામુણ્ડા ગણનાથરુદ્રસહિતા રક્ષન્તુ માં માતરઃ ॥ ૨૦॥

અરુણકમલસંસ્થા તદ્રજઃપુઞ્જવર્ણા
કરકમલધૃતેષ્ટાભીતિયુગ્મામ્બુજા ચ ।
મણિમુકુટવિચિત્રાઽલઙ્કૃતા કલ્પજાલૈ-
ર્ભવતુ ભુવનમાતા સન્તતં શ્રીઃ શ્રિયે નઃ ॥ ૨૧॥

હેમપ્રખ્યામિન્દુખણ્ડાત્તમૌલિં શઙ્ખારિષ્ટાભીતિહસ્તાં ત્રિનેત્રામ્ ।
હેમાબ્જસ્થાં પીતવર્ણાં પ્રસન્નાં દેવીં દુર્ગાં દિવ્યરૂપાં નમામિ ॥ ૨૨॥

સિન્દૂરારુણવિગ્રહાં ત્રિનયનાં માણિક્યમૌલિસ્ફુરત્-
    તારાનાયકશેખરાં સ્મિતમુખીમાપીનવક્ષોરુહામ્ ।
પાણિભ્યામતિપૂર્ણરત્નચષકં રક્તોત્પલં બિભ્રતીં
    સૌમ્યાં રત્નઘટસ્થરક્તચરણાં ધ્યાયેત્પરામમ્બિકામ્ ॥ ૨૩॥

બિભ્રાણા શૂલબાણાસ્યરિસદરગદાચાપપાશાન્ કરાબ્જૈ-
    ર્મેઘશ્યામા કિરીટોલ્લસિતશશિકલા ભીષણા ભૂષણાઢ્યા ।
સિંહસ્કન્ધાધિરૂઢા ચતસૃભિરસિખેટાન્વિતાભિઃ પરીતા
    કન્યાભિર્ભિન્નદૈત્યા ભવતુ ભવભયધ્વંસિની શૂલિની વઃ ॥ ૨૪॥

અષ્ટૌભુજાઙ્ગીન્ મહિષસ્ય મર્દિનીં સશઙ્ખચક્રાં શરશૂલધારિણીમ્ ।
તાં દિવ્યરૂપાં સહ જાતવેદસીં દુર્ગાં સદા શરણમહં પ્રપદ્યે ॥ ૨૫॥

મહિષમસ્તકનૃત્તવિનોદનસ્ફુટરણન્મણિનૂપુરમેખલા ।
જનનરક્ષણમોક્ષવિધાયિની જયતુ શુમ્ભનિશુમ્ભનિષૂદની ॥ ૨૬॥

ઉદ્ધતૌ મધુકૈટભૌ મહિષાસુરં ચ નિહત્ય તં
    ધૂમ્રલોચન ચણ્ડ મુણ્ડ રક્તબીજમુખાંશ્ચ તાન્ ।
દુષ્ટશુમ્ભનિશુમ્ભમર્દિનિ નન્દિતાઽમરવન્દિતે
    વિષ્ટપત્રયતુષ્ટિકારિણિ ભદ્રકાલિ નમોઽસ્તુ તે ॥ ૨૭॥

લક્ષ્મીપ્રદાનસમયે નવવિદ્રુમાભાં
    વિદ્યાપ્રદાનસમયે શરદિન્દુશુભ્રામ્ ।
વિદ્વેષિવર્ગવિજયેઽપિ તમાલનીલાં
    દેવીં ત્રિલોકજનનીં શરણં પ્રપદ્યે ॥ ૨૮॥

ચન્દ્રહાસં ત્રિશૂલં ચ શઙ્ખચક્રગદાસ્તથા ।
ધનુર્બાણં ચ મુસલં પિઙ્ગલં મુષ્ટિમેવ ચ ॥ ૨૯॥

પાશાઙ્કુશભુસુણ્ઠીશ્ચ મુદ્ગરં પરશું તથા ।
વજ્રાયુધં ચ કુન્તં ચ ખટ્વાઙ્ગં ચ હલાયુધમ્ ॥ ૩૦॥

તૂણીરં ક્ષુરિકાં મુદ્રાં તોમરં પાનપાત્રકમ્ ।
પટ્ટસન્દણ્ડનાગં ચ કુન્તદન્તૌ તથૈવ ચ ॥ ૩૧॥

દર્પણં રુદ્રવીણાં ચ બિભ્રદ્દ્વાત્રિંશદોસ્તલામ્ ।

પદ્મરાગપ્રભાં દેવીં બાલાર્કકિરણારુણામ્ ॥ ૩૨॥

રક્તવસ્ત્રપરીધાનાં રક્તમાલ્યાનુલેપનામ્ ।
દશપાદામ્બુજાં દેવીં દશમણ્ડલપૂરિતામ્ ॥ ૩૩॥

દશાનનાં ત્રિનેત્રાં ચ સમુન્નતપયોધરામ્ ।
એવં ધ્યાયેન્મહાજ્વાલાં મહિષાસુરમર્દિનીમ્ ॥ ૩૪॥

સર્વદારિદ્ર્યશમનીં સર્વદુઃખનિવારિણીમ્ ।
બ્રહ્માણ્ડમધ્યજિહ્વાં તાં મહાવક્ત્રકરાલિનીમ્ ॥ ૩૫॥

દશસાહસ્રદોર્દણ્ડાં નાનાશસ્ત્રાસ્ત્રધારિણીમ્ ।
વિચિત્રાયુધસન્નદ્ધાં વિશ્વરૂપાં શિવાત્મિકામ્ ॥ ૩૬॥

દાનવાન્તકરીં દેવીં રક્તબીજવધોદ્યતામ્ ।
રક્તવસ્ત્રધરાં ચણ્ડીં ભીષણામતિભૈરવામ્ ॥ ૩૭॥

સમ્પૂર્ણયૌવનાં લક્ષ્મીં કાલિકાં કમલાનનામ્ ।
મધુકૈટભસહર્ત્રીં મહિષાસુરમર્દિનીમ્ ॥ ૩૮॥

ચણ્ડમુણ્ડશિરશ્છેત્રીં સર્વદૈત્યનિષૂદિનીમ્ ।
રક્તબીજસ્ય સહર્ત્રીમશેષાસુરભક્ષિણીમ્ ॥ ૩૯॥

નિશુમ્ભશુમ્ભમથિનીમશેષાયુધભીષણામ્ ।
મહાબ્રહ્માણ્ડમાલાઙ્ગીં સર્વાભરણભૂષિતામ્ ॥ ૪૦॥

વેતાલવાહનારૂઢાં સિંહવ્યાઘ્રાદિવાહનામ્ ।
નરરક્તપ્રિયાં માયાં મધુમાંસોપહારિણીમ્ ॥ ૪૧॥

ય ઇદં શ ृણુયાન્નિત્યં ત્રિસન્ધ્યં યઃ પઠેન્નરઃ ।
ઋણકોટ્યપહરણં રોગદારિદ્ર્યનાશનમ્ ॥ ૪૨॥

સર્વસિદ્ધિકરં પુણ્યં સર્વકામફલપ્રદમ્ ।
ભક્તાનન્દકરીં દેવીં પરબ્રહ્મસ્વરૂપિણીમ્ ॥ ૪૩॥

તામષ્ટાદશપીઠસ્થાં ત્રિપુરામધિદેવતામ્ ।
વન્દે વિશ્વેશ્વરીં દેવીં ભુક્તિમુક્તિફલપ્રદામ્ ॥ ૪૪॥

હદં સપ્તશતીધ્યાનં સર્વરક્ષાકરં નૃણામ્ ।
રસં રસાયનં સિદ્ધ્યેદ્ગુલિકાઞ્જનસિદ્ધિદમ્ ॥ ૪૫॥

પાદુકાયુગુલં સિદ્ધ્યેન્મન્ત્રસિદ્ધિકરં નૃણામ્ ।
સૌન્દર્યરાજસમ્માનપુત્રપૌત્રાભિવર્ધનમ્ ॥ ૪૬॥

ઐશ્વર્યલાભવિજયભુક્તિમુક્તિફલપ્રદમ્ ।
સદાસન્નિહિતાં લક્ષ્મીં ચણ્ડિકાં મમ દેવતામ્ ॥ ૪૭॥

સ્મરેન્નિત્યં પ્રયત્નેન ષણ્માસાત્પ્રાપ્યતે ફલમ્ ।
મહાભયાપહરણં શત્રુક્ષયકરં તથા ॥ ૪૮॥

અચલાં શ્રિયમાપ્નોતિ સર્વવ્યાધિવિનાશનમ્ ।
અન્તે સ્વર્ગં ચ મોક્ષં ચ સત્યમેવ ન સંશયઃ ।

ઇતિ શ્રીકાશીકર અનન્તભટ્ટસુતરામકૃષ્ણભટ્ટસમ્પાદિત-
સપ્તશતીધ્યાનાત્મકસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*saptashatIdhyAnAtmakaM stotram*
pdf was typeset on June 13, 2021

Please send corrections to *sanskrit@cheerful.com*